दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठकृष्णदशमी
बैशाख 29 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-199 | 1 | मई 12, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 असमराज्ये अद्य हेमन्त-बिस्व-शर्मा निरन्तरं द्वितीयवारं मुख्यमन्त्रिरूपेण शपथं ग्रहीष्यति

3 'हिमाचलप्रदेशे सर्वकारी-सेवायै 'एण्टी- चिट्टा- परीक्षणम्' अनिवार्यम्, मुख्यमन्त्रिणः घोषणा

4 "गृहे गृहे संस्कृतम्" योजनायाः मईमासीय- ऑनलाइन- सत्राणाम् उद्घाटनम्

## आगामि-एकं-वर्षं यावत् तैलेन्धनानां संयमित-उपयोगः करणीयः-प्रधानमन्त्री



प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवानयत् केन्द्र सर्वकारस्य निरन्तर प्रयासैः भारतं पश्चिम-एशिया-सङ्घर्षेण उत्पन्नस्य ऊर्जा सङ्क स्य प्रभावी रीत्या प्रबन्धनं करोति। तेलङ्गाना-राज्यस्य राजधान्यां हैदराबाद-नगरे एकां जनसभां सम्बोधयन श्रीमोदी नागरिकेभ्यः आह्वानं अकरोत यत आगामि-एक-वर्ष यावत तैलेन्धनानां संयमित-उपयोगः करणीयः। तेन अनपेक्षित-विदेश यात्राभ्यः दूरीकरणं, स्वर्ण-क्रयणे नियन्त्रणं तथा च स्थानीय-वस्तूनां प्राधान्यं स्वीकर्तुं विशेषः आग्रहः कृतः, येन देशस्य अर्थव्यवस्था सुदृढा स्यात्

## केन्द्रप्रशासनेन (VB-G RAM G) इति अधिनियमः अधिसूचितः

केन्द्रप्रशासनेन पंचविंशत्युत्तर द्विसहस्रतमवर्षस्य 'विकसित भारत आजीविका-प्रत्याभूति-अभियानम (ग्रामीणम) अधिनियमः, (VB-G RAM G) इति अधिसूचितः। अधिनियमोऽयं अस्य वर्षस्य जुलाई-मासस्य प्रथम-दिनाङ्कात कृत्स्ने हि देशे प्रवर्तिष्यते। ग्रामीण-विकास-मन्त्रालयेन प्रख्यापितं यत अयं अधिनियमः प्रत्येकस्मिन वित्तवर्षे पंचविंशत्युत्तरैकशत दिनानां वैतनयुत-आजीविकायाः प्रत्याभूतिं दत्त्वा ग्रामीण-भारतं सशक्तं करिष्यति। अस्मदीय वार्ताहरैः प्रोदीरितं यत देशे अस्य प्रत्यग्र-तन्त्रस्य सञ्चालनाय अस्मिन वित्तवर्षे द्विनवत्युत्तर षट्शताधिक पंचनवतिसहस्र-कोटि रूप्यकाणां प्रावधानं विहितम्।

## प्रधानमन्त्री नरेन्द्रमोदी गुजरातराज्यस्य सोमनाथमन्दिरे सोमनाथ-अमृतपर्व-महोत्सवावसरे विशेषपूजां अकरोत्



प्रधानमन्त्री नरेन्द्रमोदी गुजरातराज्यस्य सोमनाथमन्दिरे सोमनाथ-अमृतपर्व-महोत्सवावसरे विशेष पूजां अकरोत मन्दिरस्य पुनरुद्धारस्य पञ्चसप्तति-वर्षाणां पूर्णतामालक्ष्य एषा महापूजा आयोजिता। महापूजायाः अनन्तरं कुम्भाभिषेकः ध्वजारोहणसमारोहश्चापि सम्पन्नः। अवसरेऽस्मिन भाषमाणः प्रधानमन्त्री प्रावोचत यत, सोमनाथ-मन्दिरं देशस्य शाश्वत-आत्मनः, दिव्यतायाः सहैव अगाध श्रद्धायाः प्रतीकं वर्तते। तेन प्रोक्तं यत सोमनाथ-अमृतपर्व केवलं भूतकालस्य उत्सवः नास्ति, अपितु आगामि-सहस्र-वर्षाणि यावत। राष्ट्रस्य कृते प्रेरणास्रोतः भविष्यति। राष्ट्रिय-प्रौद्योगिक-दिवसावसरे प्रधानमन्त्री प्रोक्तवान्यत् अद्यतन-दिवसे एवं देशस्य आद्यत्वेन परमाणु-त्रयाणां परीक्षणं जातम। अनेन अस्माकं वैज्ञानिकाः विश्वस्य पुरतः भारतस्य सामर्थ्य प्रदर्शितवन्तः। पूर्वाह्णे प्रधानमन्त्री प्रभास-पानं संप्राप्य हमीरजी-गोहिल क्षेत्रं यावत एक-किलोमीटर-दीर्घ पथ-प्रदर्शनम अकरोत अस्मिन कार्यक्रमे मुख्यमन्त्री भूपेन्द्र पोलः उप-मुख्यमन्त्री हर्ष-सङ्घवी च तेन सह उपस्थितौ आस्ताम। प्रधानमन्त्री सरदार-वल्लभभाई पोलस्य प्रतिमामां पुष्पार्पणं विधाय श्रद्धाञ्जलिं समर्पितवान

## सुरक्षा-प्राचीर-निर्माणार्थं सीमा सुरक्षा-बलाय भू-हस्तान्तरणस्य निर्णयः स्वीकृतः-मुख्यमन्त्री शुभेन्दु-अधिकारी



**हिमसंस्कृतवार्ता।** पश्चिमबङ्गाल-राज्यस्य नूतन मुख्यमन्त्री शुभेन्दु-अधिकारी उद्घोषितवान यत, राज्य-सर्वकारेण बाङ्ग्लादेश-सीम्नः सुरक्षा-प्राचीर-निर्माणार्थं सीमा सुरक्षा-बलाय भू-हस्तान्तरणस्य निर्णयः स्वीकृतः। नूतन सर्वकारस्य निर्माणानन्तरं प्रथमायां मन्त्रिमण्डल-गोष्ठ्यां एते निर्णयाः स्वीकृताः। मुख्यमन्त्रिणा स्पष्टीकृतं यत आगामि-पञ्चचत्वारिंशत दिनेषु सीमा-प्राचीर-रचनार्थं भूम्यधिकारः सीमा-सुरक्षा-बलाय प्रदास्यते ।मुख्यमन्त्रिणा श्री अधिकारी इत्यमुना राज्ये केन्द्र-सर्वकारस्य महती आयुष्मान-भारतं स्वास्थ्य-योजना अन्याः च राष्ट्रिय-योजनाः प्रवर्तयितुं घोषणा कृता। अनेन सहैव मन्त्रिमण्डलेन विद्यालय-शिक्षक-पदानां आवेदकानां कृते आयुःसीमायां पञ्च-वर्षाणां वृद्धिः अपि स्वीकृता, येन युवभिः अधिकावसराः प्राप्स्यन्ते ।

## तमिलनाडु-राज्यस्य नवनिर्वाचितायां विधानसभायां शताधिकैः सदस्यैः शपथः गृहीतः



तमिलनाडु-राज्यस्य नवनिर्वाचितायां विधानसभायां शताधिकैः सदस्यैः शपथः गृहीतः। अध्यक्षेण 'करुप्पैया' महोदयेन सदस्याः शपथ ग्रहणार्थम आहूताः।मुख्यमन्त्री जोसेफ विजयः तस्य मन्त्रिमण्डलस्य सदस्याः च, विपक्षस्य नेता उदयनिधिः स्यालिनः, पूर्व-मुख्यमन्त्रिणौ एडापाडी पलानीस्वामी अपि च ओ. पनीरसेल्वम च अद्य शपथं स्वीकृतवन्तः। प्रमुखाः सदस्याः प्रेमलता विजयकान्तः, सौम्या अन्बुमणिः तथा अन्ये गठबन्धन नेतारः अपि अस्मिन समारोहे शपथं गृहीतवन्तः ।

## सुभाषितम्

**यथा खननं खनित्रेण,**
**नरो वार्यधिगच्छति।**
**तथा गुरुगतं विद्यां,**
**शुश्रूषुरधिगच्छति।।**

भावार्थः- जिस प्रकार धैर्यपूर्वक भूमि को कुदाल से गहराई तक खोदने पर भूमिगत जल का स्रोत प्राप्त हो जाता है, उसी प्रकार किसी योग्य गुरु से भी लग्न और श्रद्धापूर्वक सेवा करके ही विद्या प्राप्त हो सकती है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यावाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## वैश्विक-प्रतिकूल-स्थितिः सत्यपि देशस्य अर्थव्यवस्था सुदृढा वर्तते-एस.बी.आई



वैश्विक-प्रतिकूल-स्थितिः सत्यपि देशस्य अर्थव्यवस्था सुदृढा वर्तते। प्रकाशितेन 'एस.बी.आई. शोध' इत्यस्य प्रतिवेदनेन अनुमीयते यत आगामि-वित्तवर्षे अर्थव्यवस्था षट् दशांश षट् प्रतिशतं यावत वर्धिष्यते। प्रतिवेदने इदमपि अनुमानितं यता जी.डी.पी. वृद्धिः प्रायः सप्त दशांश द्वि प्रतिशतं भविष्यति।

# असमराज्ये अद्य हेमन्त-बिस्व-शर्मा निरन्तरं द्वितीयवारं मुख्यमन्त्रिरूपेण शपथं ग्रहीष्यति



असमराज्ये अद्य हेमन्त-बिस्व-शर्मा निरन्तरं द्वितीयवारं मुख्यमन्त्रिरूपेण शपथं ग्रहीष्यति। गुवाहाट्यां खानापारास्थितस्य पशुचिकित्सामहाविद्यालयस्य प्राङ्गणे आयोजनस्य सज्जाः प्रायः पूर्णाः अभवन्। कार्यवाहकमुख्यमन्त्री मुख्यमन्त्रिपदाय नामितश्च डॉ. हेमन्त-बिस्व-शर्मा अद्य कार्यक्रमस्थलस्य भ्रमणं कृत्वा सज्जानां निरीक्षणं गृहीतवान्। अनन्तरं माध्यमैः (मीडिया) सह वार्तालापं कुर्वन् डॉ. शर्मा न्यवेदयत् यत् प्रधानमन्त्री नरेन्द्र मोदी, गृहमन्त्री अमित शाहः, रक्षामन्त्री राजनाथ सिंहः, भाजपा-अध्यक्षः नितिन नवीनश्च श्वः शपथग्रहणसमारोहे सम्मीलिताः भविष्यन्ति। अनेन सहैव बहवः केन्द्रीयमन्त्रिणः भाजपाशासितराज्यानां मुख्यमन्त्रिणः अपि कार्यक्रमे भागं ग्रहीष्यन्ति।शपथग्रहणसमारोहेण सहैव असमराज्ये एनडीए-गठबन्धनस्य निरन्तरं तृतीयः तथा च श्रीशर्मणः द्वितीयः मुख्यमन्त्री-कार्यकालः आरप्स्यते। राज्यस्य इतिहासे निरन्तरं द्विवारं मुख्यमन्त्री भवितुं सः प्रथमः गैर-काङ्ग्रेसी नेता भविष्यति। असमविधानसभायाः १२६ आसनेषु एनडीए-दलेन १०२ आसनानि विजितानि, यत्र भाजपा-दलेन ८२ आसनानि तथा च तस्य सहयोगीदलाभ्याम्—असम गण परिषद, बोडोलैण्ड पीपुल्स फ्रण्ट इत्येताभ्यां १०-१० आसनानि प्राप्तानि।

# भारतीय जनता दलं विरुध्य संयुक्तविपक्षी-मोर्चा इति निर्मातुं ममता बनर्जी-महोदयायाः प्रस्तावः काङ्ग्रेस वामपन्थी दलैः निराकृतः




पश्चिम बङ्गालराज्ये भारतीय जनता दलं विरुध्य संयुक्त विपक्षी-मोर्चा इति निर्मातुं ममता बनर्जी-महोदयायाः प्रस्तावः काङ्ग्रेस वामपन्थी दलैः निराकृतः ।तृणमूल-काङ्ग्रेस-नेतृ ममता बनर्जी काङ्ग्रेस-मार्क्सवादी कम्युनिस्-दलं समेत्य सर्वेषां विपक्षी-दलानां भाजपा-विरुद्ध एकत्रीकरणाय आह्वानं कृतवती । परञ्च काङ्ग्रेस-प्रवक्त्रा सौम्या ऐच-रॉय इत्यमुना एषः प्रस्तावः निराकृतः। तेन पृष्टं यत ममता-महोदया सम्प्रति वामपन्थी-समूहानां चर्चा किमर्थं करोति ? रॉय-महोदयेन त्रयोदशाधिक-द्विसहस्रतमे वर्षे काङ्ग्रेस कार्यकर्तृणां विरुद्धं जातायाः माओवादी-हिंसायाः उल्लेखोऽपि कृतः। तेन आरोपितं यत तृणमूल काङ्ग्रेस-दलेन एव पूर्व-निर्वाचनेषु काङ्ग्रेस-दलस्य मानहानिः कृता तथा च बङ्गाल राज्ये भाजपा-दलाय अवसरः प्रकल्पितः । अपरत्र माकपा-दलस्य प्रदेश सचिवः मोहम्मद सलीमः अपि एतं प्रस्तावं निराकृत्य ममता बनर्जी तर्जितवान सी.पी.आई. दलस्य प्रदेशसचिवेन स्वपन-बन्द्योपाध्यायेन स्पष्टीकृतं यत् ममता इत्यनया सह सहकार्यस्य प्रश्नः एव न उद्भवति।

# रेलमंत्री अश्विनी वैष्णवः दोहरीघाट-औंरिहार-यात्रीरेलयानाय आभासीयमाध्यमेन (वर्चुअल) हरितसंकेतं प्रदर्शितवान्



रेलमंत्री अश्विनी वैष्णवः अद्य चलच्चित्र-संवाद-माध्यमेन (वीडियो कॉन्फ्रेंसिंग) दोहरीघाट-औंरिहार-यात्रीरेलयानाय आभासीरूपेण हरितसंकेतं दर्शयित्वा प्रस्थानं कारितवान्। एषा नवीना रेलसेवा मऊ-गाजीपुर-मण्डलयोः यात्रिभ्यः अल्पव्यययुक्तां, सुरक्षितां, सुखद-सम्पर्कसुविधां च प्रदास्यति। एतद् रेलयानं सादात, जखनियां, दुल्लापुर, मऊ, इंदरा, कोपागंज, घोसी, अमिला, मुरादपुर-स्थानकेषु च स्थातुं (विश्रामं कर्तुं) शक्नोति। श्रीवैष्णवः अवदत् यत् इयं रेलसेवा शीघ्रमेव वाराणसी-नगरं यावत् विस्तारयिष्यते। रेलमन्त्रिणा सूचितं यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना २०२३ तमे वर्षे दिसम्बर-मासे अस्याः नवीनायाः परिवर्तित-रेलवीथिकायाः (लाइन) रेलसेवाभ्यः हरितसंकेतः प्रदत्तः आसीत्। श्रीवैष्णवः उत्तरप्रदेशे प्रचलन्तीनां बहूनां प्रमुखानां रेल-आधारभूत-संरचना-परियोजनानां रूपरेखां प्रस्तुतवान्। सः अवदत् यत् गङ्गायाः दक्षिणभागे प्रयागराज-कानपुर-आगरा-देहली-मार्गे एका प्रमुखा चतुर्वीथिका (फोर-लाइन कॉरिडोर) विकसिता अस्ति। सः अधिकम् उवाच यत् गङ्गायाः उत्तरभागे एका विशाला चतुर्वीथिका-रेलवीथिका विकसिता भवन्ती अस्ति, या देहलीं गाजियाबाद-मुरादाबाद-बरेली-सीतापुर-गोंडा-गोरखपुर-मार्गेण बिहार-पूर्वोत्तरराज्यैः सह जोजयिष्यति।श्रीवैष्णवेन उक्तं यत् वाराणस्याः पुरातनः 'मालवीय-सेतुः' जीर्णः भवति, अतः तस्य समानान्तरं एकः नूतनः सेतुः निर्मीयते, यस्य अधस्तले (लोअर डेक) चतस्रः रेलवीथिकाः उपरि च षड्वीथिका-राजमार्गः (सिक्स लेन हाईवे) भविष्यति। केन्द्रीयमन्त्रिणा ज्ञातं यत् उत्तरप्रदेशे १५७ 'अमृत भारत' स्थानकानि विकसितानि क्रियन्ते, येषु २८ स्थानकेषु कार्यं पूर्णं जातम्।श्रीवैष्णवः अवदत् यत् प्रधानमन्त्रिणा मोदिना अस्मिन् वर्षे आयव्ययके (बजट) उत्तरप्रदेशाय 'बुलेट-ट्रेन' वीथिकायाः घोषणा कृता अस्ति, यस्याः कार्यं तीव्रगत्या अग्रे सरति। सः मार्गस्य विभिन्नभागेषु प्रस्तावितं यात्रासमयम् अपि प्रदर्शितवान्, यस्मिन् देहलीतः आगरां यावत् ५८ निमेषाः, देहलीतः लखनऊं यावत् २ घण्टा १२ निमेषाः तथा च देहलीतः वाराणसीं यावत् ३ घण्टा ३० निमेषाः सम्मिलिताः सन्ति। सः आश्वासनं दत्तवान् यत् बुलेट-ट्रेन मध्यमवर्गस्य सामान्यनागरिकाणां च कृते सुलभः भविष्यति तथा च विकसितभारतस्य आधारशिलां स्थापयिष्यति।
रेलमन्त्रिणा सूचितं यत् कोविडात् (कोविड-१९) अनन्तरं उत्तरप्रदेशे प्रायः ५८ नवीनाः रेलसेवाः आरब्धाः तथा च ५६८ सेवानां विस्तारः कृतः अस्ति।

# देशस्य उत्तर-पश्चिम-भागस्य केषुचित स्थानेषु मेघगर्जनस्य, विद्युत पातस्य, प्रचण्ड-वायूनां च पूर्वानुमानं ख्यापितम्



भारतीय-ऋतु-विज्ञान-विभागेन बृहस्पतिवासरं यावत देशस्य उत्तर-पश्चिम-भागस्य केषुचित स्थानेषु मेघगर्जनस्य, विद्युत पातस्य, प्रचण्ड-वायूनां च पूर्वानुमानं ख्यापितम् अद्य च जम्मू-काश्मीर-लद्दाख क्षेत्रयोः केषुचित स्थानेषु उपलवर्षा अपि सम्भाव्यते। ऋतु-विभागेन उक्तं यत हिमाचल प्रदेशे उत्तराखण्ड-राज्ये च अद्य एतादृशी स्थितिः भविष्यति।अत्रावधेयं यत, उत्तराखण्ड-प्रशासनेन चारधाम यात्रा-यात्रिणः पर्यकाः च निवेदिताः यतप्ते राज्यस्य पर्वतीय क्षेत्रेषु प्रतिकूल स्थितिं वीक्ष्य सुरक्षिताः भवेयुः सुरक्षित-यात्रां च कुर्वन्तु ।

# सर्वोच्चन्यायालयः लम्बितानां मुक्ति-आवेदनानां (जमानत) शीघ्रनिस्तारणाय उपायान् सूचितवान्

सर्वोच्चन्यायालयः अद्य देशव्यापिनः उच्चन्यायालयानां लम्बित-मुक्ति-प्रार्थनापत्राणां (जमानत) शीघ्रनिस्तारणाय अनेकान् उपायान् सूचितवान्। मुख्यन्यायाधीशः सूर्यकान्तः न्यायमूर्तिः जॉयमाल्य बागची च इत्येतयोः अध्यक्षतायां पीठेन पीडितानां अधिकाराणां रक्षां कुर्वता अग्रिम-नियमित-जामीन-याचिकानां समयबद्ध-श्रवणाय एकायाः सुदृढ-तन्त्रस्य आवश्यकतायां बलं दत्तम्। सर्वोच्चन्यायालयः जामीन-आवेदनानां स्वतः सूचीकरणाय, तेषां निस्तारणाय समयसीमा-निर्धारणाय, कार्यसूचीषु च एतादृशानां प्रकरणानां प्राथमिकतायै परामर्शं दत्तवान्। न्यायालयेन शीघ्रनिस्तारणार्थं जामीन-याचिकाः तन्त्रांश-आधारित-प्रणाल्या (सॉफ्टवेयर) साप्ताहिक-पाक्षिकरूपेण वा सूचीबद्धं कर्तुं विकल्पः अपि सूचितः।सर्वोच्चन्यायालयः लक्षितवान् यत् प्रयागराज-उच्चन्यायालये (इलाहाबाद) बहूनि जामीन-आवेदनानि लम्बितानि सन्ति। पटना-उच्चन्यायालये अपि विलम्बं प्रति एतादृशी एव चिन्ता प्रकटीकृता। पीठेन अस्यां विषये बलं दत्तं यत् सर्वकारीय-अधिवक्तृभिः अकारण-स्थगनं निरुत्साहितं करणीयम्। एताः टिप्पण्यः पञ्जाब-हरियाणा-उच्चन्यायालयस्य एकस्य आदेशस्य विरुद्धं प्रस्तुत-याचिकायाः श्रवणकाले कृताः।

# हिमाचलप्रदेशे सर्वकारी-सेवायै 'एण्टी- चिट्टा- परीक्षणम्' अनिवार्यम्, मुख्यमन्त्रिणः घोषणा



हिमसंस्कृतवार्ताः- शिमला।

हिमाचलप्रदेशे वेगेन प्रसरतः 'चिट्टा' इति मादकद्रव्य-जालस्य विरुद्धं राज्यसर्वकारेण अधुना यावत् महान् कठोरः च पदक्षेपः स्वीकृतः। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना सोमवासरे शिमलायां आयोजित-वार्ताहर-सम्मेलने घोषितं यत् आगामि-काले सर्वकारी-वृत्तिं प्राप्तुं युवकाः अनिवार्यरूपेण 'चिट्टा-परीक्षणेन' गमिष्यन्ति। अनेन सह वैद्यक-अभियान्त्रिक- अन्य- व्यावसायिक- पाठ्यक्रमानां छात्राणाम् अपि प्रतिवर्षं मादकद्रव्यपरीक्षणं कारयिष्यते।

मुख्यमन्त्रिणा उक्तं यत् यदि कस्यचित् छात्रस्य परीक्षणे 'चिट्टा' अथवा अन्य-मादक-द्रव्याणां सेवनस्य पुष्टिः भवति, तर्हि सः साक्षात् 'पुनर्वासकेन्द्रं' प्रेषयिष्यते। तेन स्पष्टीकृतं यत् सर्वकारः युवकानां भविष्यं नष्टं न कारयिष्यति, निशाविरुद्धं च "शून्य-सहनशीलता" नीतिः स्वीकृता। सुक्खु-महोदयेन ज्ञापितं यत् पञ्चायत- निर्वाचनात् परं १ जून तः २० अगस्त पर्यन्तं प्रदेशस्य विद्यालयेषु महाविद्यालयेषु च विशेष- जागरुकता- अभियानं चालयिष्यते। अस्मिन् काले मण्डलाधिकारिणः, आरक्षक-अधीक्षकाः च शिक्षणसंस्थासु गत्वा छात्रान् मादकद्रव्याणां दुष्प्रभावानां विषये जागरूकं करिष्यन्ति। मुख्यमन्त्री स्वयं जनपदेषु गत्वा 'एण्टी चिट्टा पदयात्रासु' भागं ग्रहीष्यति।

## १२३ सर्वकारीय-कर्मचारिणः नशा- तस्करी- कार्ये संलग्नाः

मुख्यमन्त्रिणा प्रकटितं यत् प्रदेशे अधुना यावत् १२३ सर्वकारीय-कर्मचारिणः चिट्टा-तस्करी-कार्ये संलग्नाः दृष्टाः। एतेषु आरक्षक-विभागस्य २१ सैनिकाः सन्ति, ये सेवायाः निष्कासिताः। एतदतिरिच्य विद्युत् मण्डलस्य १३, शिक्षाविभागस्य १०, बैङ्किंग-क्षेत्रस्य ९, जल-शक्ति-विभागस्य ९, सेना- नौसेनायाः ८, 'एचआरटीसी' (HRTC) इत्यस्य ८ तथा वन-लोकनिर्माण-विभागानां ६-६ कर्मचारिणः अपि नशा-तस्करी-कार्येषु संलग्नाः प्राप्ताः। स्वास्थ्य- राजस्व- खाद्य- आपूर्ति- सचिवालय- पञ्चायत-होमगार्ड-सदृशेषु विभागेषु अपि कर्मचारिणां नामानि आगतानि। मुख्यमन्त्रिणा उक्तं यत् अधुना यावत् ३१ कर्मचारिणः सेवायाः निष्कासिताः, अन्येषु च कार्यविधिः प्रचलति।

## तस्कर- चिह्नीकरणाय रक्त- पीत- हरितक्षेत्राणि- निर्मितानि

सुक्खु-महोदयेन उक्तं यत् हिमाचलप्रदेशः देशस्य प्रथमं राज्यम् अभवत्, यत्र पञ्चायत-स्तरे चिट्टा-तस्कराणां परिचयं कृत्वा 'रक्त-पीत-हरित' क्षेत्राणि निर्मितानि। सर्वकारः अधुना यावत् प्रायः १२ सहस्र-तस्कराणां सन्दिग्ध-जनानां च परिचयं कृतवान्। प्रदेशस्य २२४ पञ्चायताः 'रक्तक्षेत्रं' (अति-संवेदनशील) श्रेण्यां स्थापिताः सन्ति, यत्र आरक्षकाणां 'सीआईडी' विभागस्य च विशेष-दृष्टिः वर्तते।

## पिट एनडीपीएस' कार्यविधौ हिमाचलं देशे प्रथमम्

मुख्यमन्त्रिणा ज्ञापितं यत् वर्ष २०२३ तः अधुना यावत् 'एनडीपीएस' अधिनियमस्य अन्तर्गतं ६,८११ अभियोगाः पञ्जीकृताः, यत् पूर्व-सर्वकारस्य तुलनायां ३३.१८ प्रतिशतं अधिकम् अस्ति। अस्मिन् काले १०,३५७ आरोपिणः बन्दीकृताः तथा च ४५,८६७ किलोग्राम-परिमितं 'चिट्टा' अन्य- मादक- द्रव्याणि च गृहीतानि। "पिट एनडीपीएस" नियमस्य प्रयोगाधारे हिमाचलप्रदेशः सम्पूर्णे देशे प्रथमस्थाने अस्ति। भारतस्य अस्य नियमस्य कुल- कार्यविधिषु ३३ प्रतिशतं एकाकि-हिमाचले एव सन्ति।

मुख्यमन्त्रिणा एतत् अपि उक्तं यत् नशा-तस्करैः अर्जिताः ७० सम्पत्तयः चिह्निताः सन्ति। एतेषु १७ अवैध-सम्पत्तयः ध्वस्ताः कृताः। अनेन सह नशा-तस्करी- सूचना-दातृभ्यः पुरस्कारराशिः १० सहस्रतः वर्धयित्वा २० सहस्र-रूप्यकाणि कर्तुं निर्णयः स्वीकृतः।

# अधुना अनुत्तीर्णतायाम् अपि पञ्च अवसराः लप्स्यन्ते, 'एम्स' एमबीबीएस-छात्रेभ्यः शुभसंवादः, अस्मादेव सत्रात् नियमाः प्रवर्तन्ते

हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।

अखिलभारतीय-आयुर्विज्ञान-संस्थाने (AIIMS) 'एमबीबीएस' (MBBS) अध्ययनं कुर्वद्भ्यः छात्रेभ्यः अत्यन्तं सुखदः समाचारः प्राप्तः। एम्स-प्रशासनेन छात्राणां भविष्यं विचिन्त्य एकः महान् निर्णयः स्वीकृतः। अधुना एमबीबीएस-छात्राः परीक्षायाम् अनुत्तीर्णाः सति संस्थानात् निष्कासिताः न भविष्यन्ति, अपितु आत्मानं प्रमाणीकर्तुं तेभ्यः चतुर्णाम् स्थाने आहत्य पञ्च अवसराः प्रदास्यन्ते। एषः निर्णयः तेषां छात्राणां कृते 'संजीवनी' सदृशः अस्ति, ये कठिन-पाठ्यक्रमस्य मानसिक-प्रभावस्य च कारणेन परीक्षासु पृष्ठे भवन्ति स्म। 'एम्स' मध्ये एमबीबीएस-अध्ययनं देशस्य कठिनतमेषु अध्ययनेषु अन्यतमं मन्यते। अत्र परीक्षा-मानाङ्काः तावन्तः उच्चाः सन्ति यत् प्रतिवर्षं केचन मेधाविनः छात्राः अपि केषाञ्चित् कारणानां वशात् अनुत्तीर्णाः भवन्ति।संस्थानस्य पुरातन-मार्गदर्शिकायाः (Guidelines) अनुसारं, यदि कश्चित् छात्रः चतुर्षु प्रयासेषु स्वपरीक्षां उत्तीर्णं कर्तुं न शक्नोति स्म, तर्हि तस्मै अनिवार्यरूपेण संस्थानं त्यक्तव्यं भवति स्म। छात्रवृत्तिं (Career) विनाशं प्रति रक्षितुं एम्स-संस्थानस्य कार्यकारी-निदेशिकया निवृत्त-मेजर-जनरल-डॉ. विभा-दत्ता महोदयया 'दया-आधारेण' (Mercy basis) एकस्य अतिरिक्त-अवसरस्य प्रस्तावः उपस्थापितः। अस्मिन् ऐतिहासिक-निर्णये सूचनां ददती डॉ. विभा-दत्ता उक्तवती— "एमबीबीएस-छात्रेभ्यः अधुना अनुत्तीर्णतायां चतुर्णाम् स्थाने पञ्च अवसराः दीयन्ते। नियमानुसारं पूर्वं केवलं चत्वारः एव अवसराः प्राप्यन्ते स्म, किन्तु वयं छात्राणां भविष्यं तेषां सङ्घर्षं च दृष्ट्वा दया-आधारेण पुनरेकम् अवसरं दातुं निर्णयं कृतवन्तः।"

## स्थायी-समित्या दत्ता अनुमतिः

डॉ. विभा-दत्तायाः अस्य प्रस्तावस्य उपरि एम्स-संस्थानस्य स्थायी-समित्याः (Standing Committee) उपवेशने गहना चर्चा अभवत्। समित्या अङ्गीकृतं यत् चिकित्सा-शिक्षायाः (Medical studies) मानसिकभारः बहुवारं छात्राणां प्रदर्शने प्रभावं जनयति। उपवेशने सर्वसम्मत्या अस्मिन् प्रस्तावे सहमति-मुद्रा अङ्किता। सर्वतः महत्त्वपूर्णा वार्ता एषा अस्ति यत् अस्य नूतन-नियमस्य प्रवर्तनाय आगामी-वर्षस्य प्रतीक्षा न कृता। संस्थानेन स्पष्टीकृतं यत् एषः नूतन-नियमः अस्मादेव शैक्षणिक-सत्रात् प्रभाविरूपेण प्रवर्तितः अस्ति। अधुना यदि कश्चित् छात्रः चतुर्वारं अनुत्तीर्णः भवति, तर्हि तस्मै पञ्चमवारं 'दयावसरः' (Mercy Chance) इति रूपेण अन्तिमः अवसरः प्रदास्यते।

# शिमला-शाक-विपण्यां हमीरपुर-नगर-केन्द्र-परियोजनासु च तीव्रताम् आनेतुं मुख्यमन्त्रिणः निर्देशाः

हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना नगर-विकास-विभागस्य उपवेशनस्य अध्यक्षतां कुर्वता उक्तं यत् शिमला-नगरे 'शाक-विपणि-केन्द्रीय-व्यापारिक-मण्डल' (CBD) परियोजनायाः तथा हमीरपुरस्य प्रस्तावित नगर-केन्द्र- ('सिटी-सेण्टर') परियोजनायाः अन्तर्गतं राज्यसर्वकारः विश्वस्तरीयं व्यापारिकम् आर्थिकं च केन्द्रं विकसितं कुर्वन् अस्ति। तेन उक्तं यत् नगरेषु सम्मर्दं न्यूनीकर्तुं, संस्थागत-आधारभूत-संरचनानां सुदृढीकरणाय तथा आधुनिक-व्यावसायिक-स्थलानां, 'स्मार्ट-पार्किंग'-सुविधानां, हरित-नील-सार्वजनिक-क्षेत्राणां च माध्यमेन एताः परियोजनाः स्थायी-राजस्व-सृजनस्य दिशि सहायिकाः सिद्धाः भविष्यन्ति। मुख्यमन्त्रिणा विभागं एतासां परियोजनानां क्रियान्वयने तीव्रता आनेतुं निर्दिष्टम्।

### ३३० कोटि-रूप्यकैः विकसिता भविष्यति शिमला-शाक-विपणिः

मुख्यमन्त्रिणा उक्तं यत् शिमला-नगरस्य शाक-विपणि-परियोजना द्वयोः चरणयोः विकसिता भविष्यति, यस्य कृते ३३० कोटि-रूप्यकाणि व्ययितानि भविष्यन्ति। प्रथम-चरणे २१० कोटि-रूप्यकाणि व्ययिष्यन्ते, येषु १६० कोटि-रूप्यकाणां धनराशिः पूर्वमेव नगर-निगमाय लोक-निर्माण-विभागाय च प्रदत्ता। तेन नगर-निगम-शिमला निर्दिष्टा यत् ५३ आवासाः, षट् शेड्-पटलानि, 'एसजेपीएनएल' कार्यालयः च ११ मई पर्यन्तं, पार्षद-कार्यालयः खाद्य-सुरक्षा-कार्यालयः च १५ मई पर्यन्तं तथा पञ्च आपणानि २१ मई २०२६ पर्यन्तं रिक्तं कारयितुं निश्चयं कुर्वन्तु। येन लोक-निर्माण-विभागः एताः संरचनाः ध्वाङ्क्षयित्वा ११ जुलाई २०२६ पर्यन्तं निर्माण-कार्यार्थं स्थानं सज्जं कर्तुं शक्नुयात्। मुख्यमन्त्रिणा अधिकारिणः अगस्त २०२६ पर्यन्तं निविदा-प्रक्रियां (Tender) पूर्णं कर्तुं निर्दिष्टाः।

## हमीरपुर-नगरे १४० कोटि-रूप्यकाणां नगर-केन्द्रम्

हमीरपुरे प्रस्तावितायाः १४० कोटि-रूप्यकाणां नगर-केन्द्र-परियोजनायाः समीक्षां कुर्वता मुख्यमन्त्रिणा उक्तं यत् नूतन-बस-स्थानकं शीघ्रमेव पूर्णं भविष्यति, पुरातन-बस-स्थानकं च ध्वाङ्क्षयित्वा एषा परियोजना निर्मिता भविष्यति। अस्यै परियोजनायै ८० कोटि-रूप्यकाणां धनराशिः स्वीकृता, अवशिष्टा धनराशिः च 'पीपीपी' (PPP) माध्यमेन सङ्ग्रहीष्यते।

# दिल्ली-शिमला, शिमला-धर्मशाला विमान-सेवा प्रारब्धा, शिमला-विमानपत्तनक्षेत्रे विमानाय जल-अभिवादनं दत्तम्

**हिमसंस्कृतवार्ताः - शिमला।** सप्त-मासानां अन्तरालस्य अनन्तरं प्रदेशे दिल्ली-शिमला तथा शिमला-धर्मशाला विमान-सेवाः पुनः प्रारब्धाः। सोमवासरे 'एलायन्स एयर' इत्यस्य प्रथम-विमानस्य शिमला-जुब्बड़हट्टी-विमानक्षेत्रे प्राप्तौ विमानाय जल-अभिवादनं (वाटर सैल्यूट) दत्तम्, विमानक्षेत्रस्य कर्मचारिभिः च पुष्पगुच्छैः यात्रिकाणां स्वागतं कृतम्। दिल्ली-तः शिमलां प्राप्तवति विमाने अष्ट यात्रिकाः आसन्, यदा तु शिमला-तः धर्मशालायै द्वौ यात्रिकौ प्रस्थितौ। धर्मशाला-तः शिमलां पञ्च यात्रिकाः प्राप्ताः, शिमला-तः दिल्लीं प्रति च पञ्च यात्रिकाः उड्डयनं कृतवन्तः। सोमवासरे न्यून-दृश्यता-कारणेन (Low visibility) विमानं जुब्बड़हट्टी-विमानक्षेत्रे प्रथमप्रयत्ने अवतरितुं (Land) न शक्तम् आसीत्।

'एलायन्स एयर' एतेषु मार्गेषु एटीआर-४२ (६००) विमानस्य सञ्चालनं करिष्यति। तान्त्रिक-दृष्ट्या एतत् ४८ आसन्द-युक्तं (Seater) विमानं वर्तते, किन्तु जुब्बड़हट्टी-विमानक्षेत्रस्य भौगोलिक-परिस्थितीनां, औन्नत्यस्य, लघु-धावनमार्गस्य (Short runway) च कारणेन विमानं सीमित-भारेण (Payload) सह सञ्चालनीयं भवति। दिल्ली-तः शिमलां आगच्छन्ति उड्डयने प्रायः ४७ यात्रिकाः आनेतुं शक्यन्ते, यदा तु शिमला-तः दिल्लीं प्रति उड्डयन-काले अधिकतमं २४ तः २८ यात्रिकाः एव उपवेष्टुं शक्ष्यन्ति।

शिमला-धर्मशाला मार्गे अपि वातावरणस्य धावनमार्गस्य च स्थिति-अनुसारं यात्रिकाणां सङ्ख्या सीमिता स्थापयिष्यते। गते वर्षे २५ सितम्बर २०२५ दिनाङ्के 'एलायन्स एयर' प्रदेश-सर्वकारयोः मध्ये जातः सन्धिः (Agreement) समाप्तः अभवत्, येन २ नवम्बर २०२५ दिनाङ्कतः विमान-सेवाः स्थगिताः आसन्। अधुना सेवानां पुनरारम्भेन पर्यटन-व्यवसायिभ्यः यात्रिकेभ्यः च साहाय्यं मिलिष्यति इति आशा वर्तते। तथापि अस्मिन् वारे विमान-शुल्के महती वृद्धिः जाता। दिल्ली-शिमला मार्गस्य शुल्कं प्रायः ४५०० रूप्यकतः वर्धित्वा ७४४१ रूप्यकाणि अभवत्, यदा तु शिमला-धर्मशाला मार्गस्य शुल्कं २१०० रूप्यकतः ४१२५ रूप्यकाणि प्राप्तम्।

"सोमवारतः दिल्ली-शिमला तथा शिमला-धर्मशाला मध्ये विमान-सेवाः सुचारु-जाताः। शिमला-विमानक्षेत्रे विमानाय जल-अभिवादनं (Water Salute) दत्तं यात्रिकाणां च स्वागतं कृतम्।"
— सतीश कुमारः, निदेशकः, भारतीय-विमानपतन-प्राधिकरणं शिमला-विमानक्षेत्रम्।

## विमानस्य समयसारिणी

दिल्ली-शिमला-दिल्लीः एषा सेवा सोम-बुध-गुरु-शुक्र-शनि-रवि-वासरेषु भविष्यति। सोम-बुध-गुरु-शुक्र-वासरेषु विमानं प्रातः ७:२० वादने दिल्ली-तः प्रस्थाय ८:३५ वादने शिमलां प्राप्स्यति। प्रत्यागमन-काले ११:३० वादने शिमला-तः उड्डयनं कृत्वा १२:४० वादने दिल्लीं प्राप्स्यति।शिमला-धर्मशाला-शिमलाः एषा सेवा सोम-बुध-गुरु-शुक्र-शनि-वासरेषु सञ्चालिता भविष्यति। सोम-तः शुक्र-वासरपर्यन्तं विमानं प्रातः ९:०० वादने शिमला-तः प्रस्थाय ९:५० वादने धर्मशालां प्राप्स्यति तथा प्रत्यागमने १०:१५ वादने धर्मशाला-तः उड्डयनं कृत्वा ११:०५ वादने शिमलां प्राप्स्यति।

### विमानाय 'जलाभिवादनं' किमर्थं दीयते?

जल-अभिवादनं (Water Salute) एका सम्मानसूचिका परम्परा वर्तते, यस्यां अग्निशमन-यन्त्राणां (Fire Brigade) साहाय्येन विमानस्य उपरि जलस्य द्वे धारे 'तोरण' (Arc) रूपेण मुच्येते। एतत् विमानस्य अभिनन्दनस्य, सुप्रस्थानस्य अथवा गौरव-प्रदानस्य प्रतीकं मन्यते।



हिमसंस्कृतवार्ताः, ईंदरधीरजः,हैदराबादः

# वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। प्रथमा वार्ता प्रेरणादायिका अस्ति। एकेन उच्चशिक्षण- संस्थायाः छात्रेण लक्ष-रुप्यकाणां वैदेशिक- प्रशिक्षणं त्यक्तम्। तेन स्वदेशे नूतनोद्यमः स्थापितः अस्ति।

**नन्दिनी-** सः युवकः स्वदेशाय महत् कार्यं कृतवान् अस्ति। परं द्वितीया वार्ता चिन्ताजनिका अस्ति। एका महिला गृहात् कार्यावसरं न स्वीकृतवती अस्ति, यतः तया यन्त्रेण निरीक्षणं न इष्टम्।

**काव्या-** सा महिला आत्मसम्मानं रक्षितवती अस्ति। अन्या वार्ता तु विचित्रा अस्ति। कश्चन जर्मन-देशीयः यात्री न्यायालयात् धनं प्राप्तवान् अस्ति। तेन वसतिगृहस्य विरुद्धं आसन्द-विषये आक्षेपः कृतः।

**नन्दिनी-** सः यात्री स्वकीयम् अधिकारं प्राप्तवान् अस्ति, एतत् उचितम् एव। अन्तिमा वार्ता तु कारुण्यपूर्णा अस्ति। एकेन पुरुषेण निजमस्तकस्य मुण्डनं कृतम्, यतः तस्य पत्नी अर्बुद-रोगस्य कारणेन केशान् त्यक्तवती अस्ति।

**काव्या-** तस्य पुरुषस्य त्यागः अतीव हृदयस्पर्शी अस्ति। सः पत्न्याः दुःखं विभक्तवान् अस्ति। अद्य एतावत्यः एव वार्ताः।

# "गृहे गृहे संस्कृतम्" योजनायाः मईमासीय-ऑनलाइन-सत्राणाम् उद्घाटनम्

- **संस्कृतस्य व्यवहारिकरूपेण प्रचाराय तथा संस्कृतशास्त्राणां संरक्षणाय प्रतियोगितानां महती भूमिका- जगदानन्द झा**

**हिमसंस्कृतवार्ताः- लखनऊ, ११ मई २०२६।** उत्तरप्रदेशशासनस्य स्वायत्तशासिना उत्तरप्रदेश-संस्कृतसंस्थानम् इत्यनेन सञ्चाल्यमानायाः "गृहे गृहे संस्कृतम्" योजनायाः अन्तर्गतं संस्कृतभाषाशिक्षणकक्षाणां मईमासीय- ऑनलाइन-सत्राणाम् उद्घाटनं सोमवासरे सम्पन्नम्। अस्मिन् कार्यक्रमे प्रदेशस्य प्रायः ३३–३५ जनपदेभ्यः सम्बद्धानां ४० शिक्षणकेन्द्राणां सहभागिता अभवत्। केन्द्राध्यक्षाः, शिक्षकाः, संस्कृतप्रेमिणः, छात्राः छात्राश्च सहितं प्रायः १५०० शिक्षार्थिनः ऑनलाइन-माध्यमेन सहभागिनः अभवन्। अयं कार्यक्रमः संस्थानस्य कार्यकारी-अध्यक्षस्य मनीषचौहानस्य तथा निदेशकस्य प्रेमेन्द्रकुमारगुप्तस्य निर्देशने आयोजितः। कार्यक्रमे प्रशासनिक- अधिकारी जगदानन्दझाः, योजनाप्रभारी भगवानसिंहचौहानः, आमन्त्रितवक्ता धीरजमैठाणी तथा समन्वयकः अनिलगौतमः उपस्थिताः आसन्।

जगदानन्दझाः उक्तवान् यत् संस्कृतभाषायाः व्यवहारक्षेत्रे अधिकप्रयोगस्य आवश्यकता वर्तते। तेन उक्तं यत् संस्कृतशिक्षणं केवलं व्याकरणपर्यन्तं न सीमितव्यं, अपि तु संवादः, कथा, गीतम्, अभिनयः, क्रीडा तथा तकनीकीमाध्यमैः सह सम्बद्धं करणीयम्। सः अवदत् यत् मुख्यमन्त्रिणः निर्देशानुसारं कक्षा १ तः ८ पर्यन्तानां विद्यार्थिनां कृते कार्यशालाः आयोजिताः भविष्यन्ति, यासु प्रतियोगितानां माध्यमेन विद्यार्थिनां प्रतिभायाः विकासः क्रियते। तेन एतदपि उक्तं यत् जुलाईमासात् आरभ्य बेसिकविद्यालयान् सम्बद्धीकृत्य योजना अग्रे संचालिता भविष्यति।

धीरजमैठाणी "संस्कृतं समृद्धेः मूलम् संस्कृतेन भविष्यं सुदृढम्" इति विषये विचारान् प्रस्तुतवान्। तेन उक्तं यत् संस्कृतभाषा व्यवहारिकभाषारूपेण अध्यापनीया। तेन संस्कृतसंवादः, कथाकथनम्, बालगीतानि, चित्राधारितशिक्षणम्, क्रीडाकलापाः तथा डिजिटलमाध्यमानां उपयोगः इत्येषु विशेषबलं दत्तम्। ग्रीष्मावकाशकालस्य कृते भाषिकसंसाधनानां विषये अपि प्रदत्तवान् सूचनाम्। कार्यक्रमस्य सञ्चालनं प्रेरिकाअग्रवालद्वारा कृतम्। प्रारम्भे पूनमसिंहेन सरस्वतीवन्दना प्रस्तुता तथा श्रेयरायद्वारा संस्थानगीतिका गीता। अन्ते समन्वयकेन अनिलगौतमेन धन्यवादज्ञापनं कृतं तथा प्रांजलः कल्याणमन्त्रेण सह कार्यक्रमस्य समापनम् अकरोत्।

